# WEST BENGAL STATE UNIVERSITY

B.A./B.Com. Programme 3rd Semester Examination, 2020, held in 2021

## SANLCOR01T-SANSKRIT (MIL)

Time Allotted: 2 Hours Full Marks: 50

*The figures in the margin indicate full marks.*
*Candidates should answer in their own words and adhere to the word limit as practicable.*

### क–विभागः

1. अधोलिखितेषु यथेच्छं पञ्च प्रश्नाः संस्कृतेन देवनागर्या च समाधेयाः। 2×5 = 10

(क) हितोपदेशस्य रचयिता कः ?

(ख) हितोपदेशे कति प्रकरणानि सन्ति ? कानि च तानि ?

(ग) केवलं शस्त्रविद्याभ्यस्तस्य जनस्य वृद्धत्वे का दशा भवति ?

(घ) सुदर्शनः कस्य प्रदेशस्य राजा आसीत् ?

(ङ) केन अनेकसंशयच्छेदः भवति ?

(च) 'एकैकमप्यनर्थाय किमु यत्र चतुष्टयम्' – अत्र केषामुल्लेखोऽस्ति ?

(छ) राज्ञः कृते जीवलोकस्य षड् सुखानि कानि ?

2. अधोलिखितयोः एकः प्रश्नः समाधेयः। 10×1 = 10

(क) मित्रलाभस्य वृद्धव्याघ्र–लुब्धविप्रकथा संक्षेपेण लिख्यताम्। अत्र का नीतिशिक्षा अस्तीति लिख्यताम्।

(ख) मित्रलाभस्य मृगशृगालकथा संक्षेपेण वर्णनीया।

### ख–विभागः

3. अधोलिखितयोः एकः प्रश्नः समाधेयः। 10×1 = 10

(क) भर्तृहरिणा विरचितं नीतिशतकमाश्रित्य अज्ञस्य बोधोत्पादनस्य काठिन्यं वर्ण्यताम्।

(ख) नीतिशतकमनुसृत्य विद्यायाः विद्यावतश्च प्रशंसा समुपनस्यताम्।

4. अधोलिखितेषु चतुर्णां श्लोकानां व्याख्या लेख्या। तासु व्याख्यासु यथेच्छमेका अवश्यं संस्कृतेन देवनागर्या च कार्या। 5×4 = 20

(क) अज्ञः सुखमाराध्यः सुखतरमाराध्यते विशेषज्ञः।
ज्ञानलवदुर्विदग्धं ब्रह्मा अपि नरं न रञ्जयति॥

(ख) स्वायत्तमेकान्तगुणं विधात्रा विनिर्मितं छादनमज्ञतायाः।
विशेषतः सर्वविदां समाजे विभूषणं मौनमपण्डितानाम्॥

(ग) साहित्यसङ्गीतकलाविहीनः साक्षात् पशुः पुच्छविषाणहीनः।
तृणं न खादन्नपि जीवमानस्तद्भागधेयं परमं पशूनाम्॥

(घ) येषां न विद्या न तपो न दानं ज्ञानं न शीलं न गुणो न धर्मः।
ते मर्त्यलोके भुवि भारभूता मनुष्यरूपेण मृगाश्चरन्ति॥

(ङ) केयूरा न विभूषयन्ति पुरुषं हारा न चन्द्रोज्ज्वला
न स्नानं न विलेपनं न कुसुमं नालङ्कृता मूर्धजाः।
वाण्येका समलङ्करोति पुरुषं या संस्कृता धार्यते
क्षीयन्ते खलु भूषणानि सततं वाग्भूषणं भूषणम्॥

**N.B. :** *Students have to complete submission of their Answer Scripts through E-mail / Whatsapp to their own respective colleges on the same day / date of examination within 1 hour after end of exam. University / College authorities will not be held responsible for wrong submission (at in proper address). Students are strongly advised not to submit multiple copies of the same answer script.*

——×——